असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह" ॥

इति श्रीभगवद्गीतायां १७ अध्याये २८ श्लोकः ॥ ॥ निन्दितः । यथा,—

"असत्कुलप्रसूता या कान्तं विज्ञातुमक्षमा" ।

इति ब्रह्मवैवर्त्ते प्रकृतिखण्डं ॥ अनित्यं । यथा । "अज्ञानन्तु सदसद्भ्यामनिर्व्वचनीयं" । इत्यादि वेदान्तसारः ॥

असत्पथः, पुं, (न सन् पन्थाः ।) मन्दपथः । तत्पर्य्यायः । कुपथः २ कापथः ३ अध्वः ४ दुरध्वः ५ अपथः ६ कदध्वा ७ विपथः ८ कुत्सितवर्त्म ९ । इति शब्दरत्नावली ॥

असदध्येता, (तृ) त्रि, (असत् निषिद्धशास्त्रमधीते इति । असत् + अधि + इङ् + तृच् ।) असदध्ययनशाली । तत्पर्य्यायः । अजपः २ । इति हेमचन्द्रः ॥

असदृशः, त्रि, (न सदृशः । नञ्तत्पुरुषः ।) अतुल्यः । अनुपमेयः । यद्यसदृशी स्तुतिरिति पुष्पदन्तः ॥ यथा । ब्रह्मवैवर्त्ते ।

"वित्तशाठ्यमकुर्व्वाणः सम्यक्फलमवाप्नुयात् ।

कुर्व्वाणो वित्तशाठ्यन्तु लभते ऽसदृशं फलम्" ॥

इति तिथ्यादितत्त्वं ॥

असद्ग्रहः, पुं, (असति अप्राप्ये वस्तुनि ग्रहः आग्रहः ।) अखट्टिः । इति त्रिकाण्डशेषः ॥ बालकादीनां खोड्ट आवदार इत्यादिभाषा ।

असनं, क्ली, (अस्यते इति । अस + ल्युट् ।) क्षेपणं । इति मेदिनी ॥ ("इष्वानिरसने विनियोगः" । इति भवदेवः ।)

असनः, पुं, वृक्षविशेषः । पियाशाल इति ख्यातः । तत्पर्य्यायः । महासर्ज्जः २ सौरिः ३ बन्धूकपुष्पः ४ प्रियकः ५ वीजवृक्षः ६ नीलकः प्रियसालकः ८ ।

("प्रियविमानितमानवतीरुषां

निरसनैरसनैरवृथार्थता" ।

इति शिशुपाले ।) अस्य गुणाः । कटुत्वं । उष्णत्वं । तिक्तत्वं । वातार्त्तिदोषगलदोषरक्तमण्डलनाशित्वं । सारकत्वञ्च । इति राजनिर्घण्टः ॥ वृक्षभेदः । आसन इयि ख्यातः । तत्पर्य्यायः । अजकर्णः २ वनेसर्ज्जः ३ महासर्ज्जः ४ । इति रत्नमाला ॥ अस्य गुणाः । कफपित्तनाशित्वं । इति राजवल्लभः ।

("वीजकः पीतसारश्च पीतशालक इत्यपि ।

बन्धूकपुष्पः प्रियकः सर्ज्जकश्चासनः स्मृतः ॥

वीजकः कुष्ठवीसर्पश्वित्रमेहगुदक्रिमीन् ।

हन्तिश्लेष्मास्रपित्तञ्च त्वच्यः केश्यो रसायनः" ॥

इति भावप्रकाशेऽस्य पर्य्यायगुणौ कथितौ ॥ ।)

असनपर्णी, स्त्री, (असनस्य पर्णमिव पर्णमस्याः ।) वृक्षविशेषः । तत्पर्य्यायः । वातकः २ शीतलः ३ शीतलवातः ४ अपराजिता ५ शणपर्णी ६ । इत्यमरः ॥ शीतः ७ शीतकः ८ सनपर्णी ९ । इति शब्दरत्नावली ॥ माराटी इति भरतः ॥ ओमान इति सारसुन्दरी ॥

असन, [न्] पुं, इन्द्रः । इति त्रिकाण्डशेषः ॥

असन्तुष्टः, त्रि, (न सन्तुष्टः । नञ्समासः ।) सम्यक् तुष्टिरहितः । सन्तोषशून्यः । यथा,—

"असन्तुष्टा द्विजा नष्टाः सन्तुष्टा इव पार्थिवाः" ।

इति चाणक्यं ॥

असन्नद्धः, त्रि, (न सम्यक् नद्धः स्वकार्य्यक्षमः ।) समुद्धृतः । पण्डिताभिमानी । दर्पितः । इति जटाधरः ॥ अकृतसन्नाहः ॥

असन्मानं, क्ली, मानहानिः । अमर्य्यादा । अनादरः । असाधुमानं । असच्च तत् मानञ्चेति कर्म्मधारयसमासनिष्पन्नं ॥

असभ्यः, त्रि, असभासत् । समानुपयुक्तः । असामाजिकः ॥ न सभ्यः असभ्य इति नञ्समासनिष्पन्नः । खलः । यथा,—

"अयन्त्वसभ्यस्तव जन्म नो गृहे

भ्रातॄग्रजांस्ते न्यवधीत् सुरेश्वर ।

स ते ऽवतारं पुरुषैः समर्पितं

श्रुत्वाधुनैवाभिसरत्युदायुधः" ॥

इति श्रीभागवते १० स्कन्धे ३ अध्याये २० श्लोकः ॥ असभ्यः खलः । समर्पितं कथितं । इति श्रीधरस्वामी ॥

असमः, पुं, (नास्ति समो यस्य ।) बुद्धः । इति शब्दरत्नावली ॥

असमः, त्रि, विषमः । अतुल्यः । यथा । "इत्येषा सहकारिशक्तिरसमा माया दुरन्नीतितो मूलत्वात् प्रकृतिः प्रबोधभयतोऽविद्येति यस्योदिता" । इति कुसुमाञ्जलौ १ स्तवकः ॥

असमञ्जसं, क्ली, (न समञ्जसं युक्तियुक्तम् ।) असङ्गतं । अनुपयुक्तं । तत्पर्य्यायः । दुर्ज्ञातं २ दुःसङ्गं ३ । इति त्रिकाण्डशेषः ॥ ("अतिप्रणयादेतन्मयोक्तमसमञ्जसम्" । इति कथासरित्सागरे । (पुं) सगरराजज्येष्ठपुत्रः । यथा हरिवंशे ।

"केशिन्यसूत सगरादसमञ्जसमात्मजम्" ।)

असमयः, पुं, (अप्रकृष्टः समयः । नञ्समासः ।) अकालः । दुःसमयः । यथा,—

"एतान् जनान्न सेवेत व्याधिसङ्घस्य दुर्ज्जयः ।

सर्व्वं बोध्यमसमये काले सर्व्वं ग्रसिष्यति" ॥

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १९ अध्यायः ॥

असमर्थः, त्रि, (न समर्थः । नञ्समासः ।) अशक्तः । दुर्ब्बलः । यथा । ब्रह्मवैवर्त्ते ।

"उपवासासमर्थश्चेदेकं विप्रन्तु भोजयेत् ।

तावद्धनानि वा दद्याद् यद्भुक्ताद्द्विगुणं भवेत्" ।

इति तिथ्यादितत्त्वं ॥

असमवायिकारणं, क्ली, (न समवायि कार्य्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं कारणम् ।) समवायिकारणासन्नकारणं । समवायिकारणे प्रत्यासन्नजनकं । यथा । घटं प्रति कपालद्वयसंयोगः । एतत्कारणं गुणः कर्म्म च । समवायिकारणे प्रत्यासन्न हइया ये कारण हय । इति न्यायभाषा ॥ (एतत् कारणन्तु सर्व्वत्र द्रव्ये गुणः गुणे गुणः कर्म्म च । तदुक्तं भाषापरिच्छेदे । "गुणकर्म्ममात्रवृत्ति ज्ञेयमथाप्यसमवायिहेतुत्वम्" ।)

असमानं, त्रि, (नास्ति समानो यस्य ।) अतुल्यं । विजातीयं । सजातीयभिन्नं । यथा श्रुतिः ।

"समानार्थीयं प्रथमं प्रथमेन समापयेत् ।

असमानं द्वितीयेन धर्म्मराजवचो यथा" ॥

इति शुद्धितत्त्वं ॥

असमाप्तं, त्रि, (न समाप्तं । नञ्तत्पुरुषः ।) समाप्तिरहितं । असम्पूर्णं । अनिष्पन्नं । यथा । स्मृतिः ।

"असमाप्ते व्रते पूर्व्वे नैव कुर्य्याद्व्रतान्तरं" ।

इति तिथ्यादितत्त्वं ॥

असमीक्ष्यकारी, [न्] त्रि, (समीक्ष्य विचिन्त्य न करोतीति । असमीक्ष्य + कृ + णिनि ।) अविवेचनापूर्व्वककर्म्मकर्त्ता । तत्पर्य्यायः । जाल्मः २ । इत्यमरः ॥ ("उचितमेवैतत् ममासमीक्ष्यकारिणः" । इति हितोपदेशे ।)

असम्बद्धं, त्रि, (न सम्बद्धं परस्परान्वययुक्तं । नञ्समासः ।) अनर्थकवाक्यं । तत्पर्य्यायः । अबद्धं २ । इति जटाधरः ॥

("असम्बद्धकृतश्चैव व्यवहारो न सिध्यति" ।

इति मनुः । विशृङ्खलः । अनियमः । यथा भारते ।

"असम्बद्धा महाराज ! तान् निघ्नन्ति ते गजाः" इति ॥)

असम्मतः, त्रि, (न सम्मतः । नञ्समासः । अनभिमतः । तत्पर्य्यायः । प्रणाय्यः२ । इति हेमचन्द्रः ॥

("असम्मतः कस्तव मुक्तिमार्गं

पुनर्भवक्लेशभयात् प्रपन्नः" ।

इति कुमारे ।)

असम्मानं, क्ली, अमर्य्यादा । अपमानं । सम्यग्ज्ञानाभावः । न सम्मानं असम्मानमिति नञ्समासनिष्पन्नं ॥

असरः, पुं, (अस + अर ।) वृक्षविशेषः । इति शब्दचन्द्रिका ॥ कुकुरसोँका इतिख्यातः ।

असहनः, पुं, स्त्री, (न सहनः । नञ्समासः ।) शत्रुः । इति हेमचन्द्रः ॥ (अधीरः । असहिष्णुः । यथा,—

"कस्मात् प्राप्य तिरस्क्रियामसहनोऽप्यस्थादिति प्रस्तुते" । इति महावीरचरिते ।

"प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ" ।

इति रत्नावल्यां । क्षमाराहित्यम् । यथा, साहित्यदर्पणे ।

"अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत् ।

प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्" ॥

इति ॥)

असह्यः, त्रि, (न सह्यः । नञ्तत्पुरुषः ।) असहनीयः । असोढव्यः । सहनायोग्यः । यथा,—

"वरं रामशराः सह्या न च वैभीषणं वचः ।

असह्यं ज्ञातिदुर्व्वाक्यं मेघान्तरितरौद्रवत्" ॥

इति महानाटकं ॥ ज्ञातिदुर्व्वाक्यमित्यत्र दुर्व्वचो ज्ञातेरिति च पाठः ॥

असाधारणं, त्रि, (न साधारणं सामान्यधर्म्मयुक्तम् । नञ्समासः ।) साधारणभिन्नं । असामान्यं । विशेषः । न्यायमते साध्यव्यापकीभूताभावप्रतियोगिहेतुः । यथा वह्निमान् जलत्वादित्यादिः । यथा । "यत्तु प्रयागे अहस्नाने क्रोडीकृते माघस्नानभीप्सानादावसाधारणसङ्कल्पेन प्रशस्तत्वैव